International Journal of Sanskrit Research 2017; 3(2): 158-161

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(2): 158-161
© 2017 IJSR
www.anantaajournal.com
Received: 26-01-2017
Accepted: 28-02-2017

**डा. नृसिंहनाथगुरु**
सहायकाचार्यः, साहित्यविभागः
कलियाचक-विक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः
हेरिया, पूर्वमेदनीपुरम्, पश्चिमबङ्ग,
भारत

Correspondence
**डा. नृसिंहनाथगुरु**
सहायकाचार्यः, साहित्यविभागः
कलियाचक-विक्रमकिशोर-
आदर्शसंस्कृतमहाविद्यालयः
हेरिया, पूर्वमेदनीपुरम्, पश्चिमबङ्ग,
भारत

# अभिज्ञानशाकुन्तले मानवीयमूल्यबोध

**डा. नृसिंहनाथगुरु**

**उपक्रमः**

सम्प्रति समाजः कुलषितो भवति। सर्वत्र भ्रष्टाचारस्य प्रादुर्भावः दृश्यते। अनुचितसाधनावलम्बनेन, अनैतिकाचरणेन, स्वकर्तव्यस्य अपालनेन भारतस्य उन्नतिः घटते। उत्कोचप्रदानं, खाद्यवस्तुषु अखाद्यमिश्रणं, कुमार्गे धनोपार्जनं, स्वकर्तव्यं प्रति विमुखं, सर्वकारप्रदत्तसाधनानामनुचितप्रयोगकरणं, हननं, लुण्ठनं, धर्षणादि नानाविधसमस्याः समाजे प्रवर्द्धन्ते। तदेव कारणमस्ति अनुदिनं भ्रष्टाचार असाध्यरोगवत् प्रवर्तते। अयमेव भ्रष्टाचारः, दुराचारः, अधर्मः केषुचिदेव जनेषु वर्तते न, अपि तु वटवृक्षवत् शतमूलः सन् सवित्रिको रोगः प्रतिदिनं वर्धत एव। परन्तु एतत्सत्यं यत् यदा यदा भ्रष्टाचारस्य, दुराचारस्य अधर्मस्य वा अभिवृद्धिः भवति तदा तदा आदर्शसमाजनिर्माणे अस्माकं संस्कृतवाङ्मये विद्यमानानां मानवीयमूल्यबोधानामावश्यकता अनुभूयते।

देवभूमिरूपत्वेन प्रसिद्धमस्माकं भारतवर्षम्। अत्र काले काले अनेके कवयः महाकवयः वा आविर्भूय प्रकाशयन्ति आदर्शनिर्वचनेन सम्पूर्णं जगदिदं मानवीयमूल्यबोधेन प्लावयन्ति च। एतेषु एव दिव्यप्रकाशेषु अन्यतमः कविकुलगुरुः महाकविः कालिदासः। यः अर्थगाम्भीर्यं भावप्रधानं च वर्णनं सरलवाक्विन्यासेन सालङ्काराणेन स्फुटालङ्कारविहिनेन अस्फुटालङ्कारसहितेन नवरसरुचिरेण, गुणरीतिनां विनिवेशनेन भावध्वनिप्रधानेन च विदधाति। येन सहृदयानां हृदयकन्दरे प्रतिपदमुपदेशात्मकं लोकोत्तरमानन्दं जनयति। भरतमुनिना नाट्यशास्त्रे यदुक्तम् –

**धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।**
**लोकोदेशजननं नाट्यमेतद् भविष्यति॥** [i]

अतः संस्कृतनाटकानां लोकोपादेयता नितरां प्रतीयते। किञ्च 'काव्येषु नाटकं रम्यं, तत्र रम्या शकुन्तला' इति निर्वचनानुसारं संस्कृतनाटकेषु महाकविकालिदासविरचितस्य अभिज्ञानशाकुन्तलम् इति नाटकस्य न केवलं रमणीयता अपि तु मानवीयमूल्यबोधात्मकोपादेयता वर्तते इति सहृदयैरनुभूयते।

'लोको वेदस्तथाऽध्यात्मं प्रमाणं त्रिविधं स्मृतम्' इति वचनाद् व्यवहारमार्गे लोकप्रमाणं स्वीक्रियते। तत्र कविकुलतिलकः कालिदासः अभिज्ञानशाकुन्तले विविधचरित्रमुखेन मानवीयमूल्यबोधपरकोपदेशान् प्रस्तौति। लोकव्यवहारनिपुणानां मानवीयमूल्यबोधसंश्लिष्टानां महर्षि-कण्वमुखेन शकुन्तलायाः पतिगृहगमनावसरे तस्यै सम्बोधयति – 'वत्से! त्वमिदानीमनुशासनीयासि। वनौकसोऽपि सन्तो लौकिकज्ञा वयमिति'। [ii] अनेन ज्ञायते यत् महाकविः स्वयं मानवीयलोकोपदेशप्रदाने विचक्षण इति।

एवञ्च कालिदासः राज्यविषयकमूल्यबोधं विचिन्तयन् हस्तिनापुरनरेशस्य दुष्यन्तस्य चरित्रचित्रणं करोति। यद्यपि मृगयाविनोदः राजधर्मः। तथापि 'अहिंसा परमो धर्म' इति नैव विस्मर्तव्यम्। किञ्च रञ्जनात् किल राजत्वं प्रजानां पालनादपि इति पञ्चमवेदमहाभारतस्य कथनानुसारम् ऋषिकुमारैः राजा दुष्यन्तः मृगयाव्यापारात् निवार्यते। अपि च राज्ञा रक्षितव्यानि तपोवनानि इति प्रथमाङ्के अनसूया-प्रियंवदयोः उक्त्या ज्ञायते।

'स्याद् राजा भृत्यवर्गेषु प्रजासु च यथा पिता' इति वचनानुसारं राज्ञः विश्रान्तिरेव नास्तीति पञ्चमाङ्के कण्वशिष्याणामागमनाऽवसरे कञ्चुकिमनसि एषा भावना जायते यत् – 'अविश्रामो हि लोकतन्त्राधिकारः' इति। राज्यशासनं निजहस्तेन स्वीकृतछत्रमिव प्रतिभाति। छत्रधारी सर्वथा कष्टं सहते, किन्तु छत्रस्याधः वर्तमानाः मानवाः सुखमनुभवन्ति। तद्यथा – 'राज्यं स्वहस्तधृतदण्डमिवातपत्रम्' [iii] इति राजा सर्वदा निरभिलाषः स्यात्। तद्यथा –

'स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते सृष्टिरेव विधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम्॥' [iv]

राजानः सर्वथा प्रजापरिपालनदक्षाः प्रजारक्षणशीलाः दुर्खार्तानां हतभाग्यानाञ्च शरणप्रदानसंसिद्धाः भवेयुः। तद्यथा षष्ठाङ्के –

'येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना।
स स पापादृते तासां दुष्यन्त इति घुष्यताम्॥' [v]

कालिदासः प्रजानां मूल्यबोधः कीदृशो भवेत्? इत्यस्मिन् विषये निगदति यत् प्रजाः सर्वथा सत्पुरुषाः भवेयुः। कोऽपि कस्यापि सकाशात् उत्कोचं न स्वीकुर्यात्। परन्तु तत्र षष्ठाङ्के धीवरपार्श्वे अङ्गुलीयकं दृष्ट्वा दुष्यन्तस्य शकुन्तलाविषयकं ज्ञानोदयं भवति। येन सः परमहर्षेण धीवराय प्रभूतं धनमददात्।

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥ [vi]

इति स्मृतिवाक्यस्य प्रामाण्यम् अभिज्ञानशाकुन्तले दृश्यते। सामजे स्त्रीणां कृते महद्गौरवं प्रदातव्यम्। तत्र पञ्चमाङ्के परस्त्रीदर्शनं पापाय भवतीति वर्णितं दृश्यते। तद्यथा – शकुन्तलां दृष्ट्वा दुष्यन्तः चिन्तयति अनिर्वचनीयं परकलत्रम् इति। किञ्च सर्वेषां जीवने सुखदुःखानि समापतन्त्येव।

चतुर्थाङ्के प्रभातवर्णनाऽवसरे ऋषिकण्वशिष्यमुखेन वर्ण्यते यथा –

'यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरस्सर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु॥' [vii]

कालिदासः वधूजनविषयकोपदेशान् कण्वमुखेन श्रावयति। अस्माकं भारतीयपरम्परायाम् एका कन्या यदा श्वश्रूगृहं प्रति गच्छति तदा केन सह कथं व्यवहारणीयमिति ज्ञानं ज्येष्ठाः प्रयच्छन्ति।

तद्यथा कण्वः –

‘शुश्रूषस्व गुरुन् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥ ’[viii]

याः एतेषामुपदेशानां पालनं कुर्वन्ति ताः सुखमाप्नुवन्ति। याः न कुर्वन्ति ताः तु दुःखम्। कन्यकाः विवाहात्पूर्वं न केनापि अज्ञातेन पुरुषविशेषेण सह सम्पर्कं स्थापयेयुः। सर्वथा सर्वतो दृष्ट्या परीक्ष्य केनापि सह मित्रता सम्पादनीया। अन्यथा जीवनं दुर्विसहं भवेत्। तत्र पञ्चमाङ्के शार्ङ्गरवस्य वचनं यथा –

‘अतः परीक्षय कर्तव्यं विशेषात् सङ्गतं रहः।
अज्ञातहृदयेष्वेवं वैरी भवति सौहृदम्॥ ’[ix]

समाजे स्वबन्धुभिः विचार्य विवाहसम्बन्धः स्थिरीकर्तव्यः। तद्यथा–

‘सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्तृमतीं विशङ्कते।
अतस्समीपे परिणेतुरिष्यते
प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः॥ ’[x]

एवञ्च अस्मिन् संसारे केन सह कथं व्यवहरणीयं विशेषतः यदि बन्धुवर्गेषु उत्तमसम्पर्कः स्यात् तर्हि जीवनं सुखमयं भवेत्। तत्र द्वितीयाङ्के दुष्यन्तः स्वपरममित्रस्य विदूषकस्य वचनं ग्राह्यमिति सूचयति। तद्यथा – ‘अनतिक्रमणीयं मे सुहृद्वाक्यम्’ इति। यतो हि यः सुहृद्वाक्यं न श्रृणोति, तस्य जीवनं वृथा प्रायं भवति। यथा

‘सुहृदां हितकामानां यः श्रृणोति न भाषितम्।
विपत्सन्निहिता तस्य स नरः शत्रुनन्दनः’ ॥[xi]

प्रकृतिप्रेमी महाकविः कालिदासः ‘परिवेशसुरक्षा जीवनरक्षा’ इति मन्त्रेण मन्त्रितो भूत्वा सामाजिकान् जनान् मानवीयमूल्यबोधान् शिक्षयति। तत्र प्रथमाङ्के तपोवनादीनां परिरक्षणं राज्ञां परमकर्तव्यमिति सूचितम्। एवञ्च चतुर्थाङ्के माधवीलतादिषु शकुन्तलायाः भगिनीस्नेहः परिदृश्यते। तत्र पतिगृहगमनावसरे कण्वमुनिः एवं प्रकाशयति-

‘सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञाय ताम्’ ॥[xii]

अत्र तदीयः पारिवारिकस्नेहः समुदेति। किञ्च शकुन्तलायाः शरीरमण्डनार्थं तत्र सर्वविधवस्तुनि लतापादपैः प्रदत्तानि इति अद्भुतं वर्णनं परिवेशसंरक्षणार्थं सततं प्रेरयति।
एवञ्च क्रोधः अनर्थस्य कारणम् इति चतुर्थाङ्के दुर्वाससः अभिशापात् ज्ञायते। अतः समाजे सर्वेषां व्यवहारः सुश्रृङ्खलितं भवति चेत् मानवीयः मूल्यबोधः नितरां प्रतिरतां प्रतिष्ठितो भवेदिति दिक्।

सहायकग्रन्थसूची


1. संस्कृतसाहित्येतिहासः – आचार्यलोकमणिदाहालः, चौखम्बाकृष्णदास अकादमी, वाराणसी।
2. संस्कृत साहित्य का अभिनव इतिहास – डा. राधावल्लभ त्रिपाठी, विश्वविद्यालय प्रकाशन वाराणसी।
3. संस्कृत साहित्य का इतिहास – आचार्य वलदेव उपाध्याय, शारदा निकेतन वाराणसी, २२१०१०।
4. नाट्यशास्त्रम् (नाट्यचन्द्रिका-संस्कृत-हिन्दीव्याखोपेतम्, प्रथमो भागः)- सम्पादिका सुधा रस्तोगी, चौखम्बा कृष्णदास अकादमी, वाराणसी।

5. **अभिज्ञानशाकुन्तम् (विमला-चन्द्रकला - संस्कृतहिन्दीव्याख्योपेतम्) – व्याख्याकारः डा.कृष्णमणित्रिपाठी, चौखम्बा संस्कृत सिरिज अफिस, वाराणसी।**
6. **अभिज्ञानशाकुन्तलम् (भावप्रकाशिका संस्कृत-हिन्दी व्याख्या सहित) – व्याख्याकारः आचार्य पं. शिवप्रसाद द्विवेदी, भारतीय विद्या प्रकाशन वारणसी।**
7. **अभिज्ञानशाकुन्तलम् (कालिदासविरचितम्) – अनिलचन्द्रवसु सम्पादितम्, संस्कृत वुक् डिपो, कलिकाता, २००८ (चतुर्थसंस्करणम्)।**
8. **कालिदास की वैज्ञानिक दृष्टि (संस्कृतहिन्दीव्याखोपेतम्) – व्याख्याकारः डा.राकेशशास्त्री, परिमल प्रकाशन, दिल्ली।**
9. **अभिज्ञानशाकुन्तलम् (संस्कृतहिन्दीव्याखोपेतम्) – सम्पादकः टीकाकारश्च डा.शिवराजशास्त्री, मेहरचन्द लछमनदास पब्लिकेशन्स, नई दिल्ली।**
10. **कालिदास- ग्रन्थावली, उत्तरप्रदेश संस्कृत संस्थान लखनऊ।**
11. **हितोपदेशः (अभिनवराजलक्ष्मी संस्कृतटीकालंकृतः) – सम्पादकः प्रो. बालशास्त्री, चौखम्बा सुरभारती प्रकाशन।**

## पादटीप्पणी

---

[i] अभि.शा. १.११५

[ii] तत्रैव ४

[iii] तत्रैव ५.५

[iv] तत्रैव ५.६

[v] तत्रैव ६.१६

[vi] मनु. ३.५६

[vii] अभि.शा. ४.२

[viii] तत्रैव ४.२०

[ix] तत्रैव ५.२६

[x] तत्रैव ५.१८

[xi] हितोप, श्लो. - ५५

[xii] अभि.शा. ४.९